।। श्रीदिग्विजयरामो विजयते ।।

# तत्वसंख्यानम्

स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्त्वमिष्यते ।
स्वतन्त्रो भगवान्विष्णुः भावाभावौ द्विधेतरत् । १ ।
प्राक्प्रध्वंससदात्वेन त्रिविधोऽभाव इष्यते ।
चेतना चेतनत्वेन भावोऽपि द्विविधो मतः । २ ।
दुःखस्पृष्टं तदस्पृष्टं इति द्वेधैव चेतनम् ।
नित्यादुःखा रमाऽन्ये तु स्पृष्टदुःखास्समस्तशः । ३ ।
स्पृष्टदुःखा विमुक्ताद्या दुःखसंस्था इति द्विधा ।
दुःखसंस्था मुक्तियोग्या अयोग्या इति च द्विधा । ४ ।
देवर्षिपितृपनरा इति मुक्तास्तु पञ्चधा ।
एवं विमुक्तियोग्याद्या तमोगाः सृतिसंस्थिताः । ५ ।
इति द्विधा मुक्त्ययोग्याः दैत्यरक्षःपिशाचकाः ।
मर्त्याधमाद्यातुर्धैव तमोयोग्याः प्रकीर्तिताः । ६ ।
ते च प्रा'ग्गन्धतमसः सृतिसंस्था इति द्विधा ।
नित्यानित्यविभागेन त्रिधैवाचेतनं मतम् । ७ ।
नित्या वेदाः पुराणाद्याः कालः प्रकृतिरेव च ।
नित्यानित्यं त्रिधा प्रोक्तमनित्यं द्विविधं मतम् । ८ ।
असंसृष्टं च संसृष्टमसंसृष्टं महानहम् ।
बुद्धिर्मनः खानि दश मात्रा भूतानि पञ्च च । ९ ।
संसृष्टमण्डं तद्गं च समस्तं सम्प्रकीर्तितम् ।
सृष्टिः स्थितिः संहतिश्च नियमोऽज्ञानबोधने । १० ।
बन्धो मोक्षः सुखं दुःखमावृतिर्ज्योतिरेव च ।
विष्णुनास्य समस्तस्य समासव्याससयोगतः । ११ ।

**इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं तत्त्वसंख्यानं संपूर्णम्**

©uttaradimath.org